# Shashtibalaih Kritam Balakrishna Stotram

# ષષ્ટિબાલૈઃ કૃતં બાલકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Shashtibalaih Kritam Balakrishna Stotram

File name : ShaShTibAlaiHkRRitaMbAlakRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 165/48-77||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# ષષ્ટિબાલૈઃ કૃતં બાલકૃષ્ણસ્તોત્રમ્

તાપસાઃ સિદ્ધિમન્તશ્ચ યથા વૈ બ્રહ્મચારિણઃ ।
નત્વા દિવ્યં વિમાનં તે તસ્થુઃ ક્ષણં વિશશ્રમુઃ ॥ ૪૮॥

અથ ષષ્ટિર્દિવ્યરૂપા મિલિત્વા તે નરાઃ સ્ત્રિયઃ ।
વૃકાયનં તથા ચાદ્વાલર્ષીન્ સર્વાન્ પ્રણમ્ય ચ ॥ ૪૯॥

સ્તુતિં ચક્રુર્વિમાનાભિમુખં વિલોક્ય ભાવતઃ ।
એકસ્વરેણ મુદિતા નેત્રે પ્રમીલ્ય વૈ તદા ॥ ૫૦॥

વ્યાપકો યઃ પરબ્રહ્માऽનાદિશ્રીપુરુષોત્તમઃ ।
મુક્તમુક્તાનિકાસેવ્યસ્તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૧॥

અક્ષરં બ્રહ્મ યત્રાસ્તે ધામ દિવ્યં પરાત્પરમ્ ।
સેવતે યં સદા તત્ર તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૨॥

યન્મૂર્તેસ્તુ સમુત્પન્ના રાધા શક્તિઃ સુરૂપિણી ।
રાધાર્થં કૃષ્ણરૂપોऽભૂત્ તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૩॥

યં કૃષ્ણં નિત્યગોલોકે ગાવો ગોપ્યશ્ચ ગોપકાઃ ।
સેવન્તે સુખદં રાસે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૪॥

યન્મૂર્તેસ્તુ સમુત્પન્ના લક્ષ્મીર્મૂર્તિઃ સુરૂપિણી ।
નારાયણોऽભૂલ્લક્ષ્મ્યર્થં તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૫॥

યં વૈકુણ્ઠે પાર્ષદાઃ પાર્ષદાન્યશ્ચ ભગાનિ ચ ।
પ્રસેવન્તે સખીકોટ્યસ્તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૬॥

યો નાથોऽનાદિસૃષ્ટેશ્ચ પ્રવાહાર્થં ચતુષ્ટયમ્ ।
વાસુદેવાદિકં વ્યૂહં ધત્તે કૃષ્ણાય તે નમઃ ॥ ૫૭॥

યો દેવો વૈ મહાભૂમા વૈરાજશ્ચ પુરાऽભવત્ ।
ત્રિદેવતાં સમાપન્નસ્તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૮॥

યઃ સ્વમૂર્તૌ માણિકીં ચ રમાં પદ્માવતીં સતીમ્ ।
લક્ષ્મીં નારાયણીં ધત્તે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૯॥

યો હંસાં સુગુણાં મઞ્જુલિકાં ધત્તે સ્વવિગ્રહે ।
દયાં જયાં ચ લલિતાં તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૦॥

યો રાધાં યમુનાં ગઙ્ગાં વિરજાં ચ સરસ્વતીમ્ ।
શારદાં કમલાં ધત્તે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૧॥

યઃ સ્વમૂર્તેર્વિવરેષુ ધત્તે બ્રહ્માણ્ડકોટિકાઃ ।
બ્રહ્માણ્ડેષ્વન્વિતશ્ચાસ્તે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૨॥

અવ્યાકૃતેઽમૃતે ધામ્નિ શ્વેતદ્વીપે નરાયણઃ ।
યસ્ત્વાસ્તે શ્રીરમાસેવ્યસ્તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૩॥

આદિત્યમણ્ડલે હિરણ્મયો યશ્ચ વિરાજતે ।
અગ્નૌ યજ્ઞસ્વરૂપશ્ચ તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૪॥

બ્રહ્માણ્ડે વિષ્ણુરૂપો યઃ સ્વર્ગે વામનરૂપધૃક્ ।
બદર્યાં ચ હરિશ્ચાસ્તે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૫॥

શેષે નારાયણરૂપશ્ચાત્મસ્વન્તર્નિયામકઃ ।
સાક્ષી યઃ સર્વભૂતાનાં તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૬॥

યશ્ચાસ્તે બાલકૃષ્ણોઽયં શ્રીમદ્ગોપાલનન્દનઃ ।
કુઙ્કુમવાપિકાક્ષેત્રે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૭॥

યેન ગઙ્ગા કૃતા દિવ્યાઽસ્મન્માતા ષષ્ટિબાલકા ।
પાદાઙ્ગુષ્ઠેન સત્યે વૈ તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૮॥

મૂર્તિરૂપો વિમાનેઽત્ર યશ્ચાસ્તે ભગવાન્ હરિઃ ।
ગઙ્ગાઽપત્યકૃપાવર્ષી તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૬૯॥

કર્મકાણ્ડાય યોગાય જ્ઞાનાય ચ વિવિક્તયે ।
નીતયે ચ વિચારાય તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૭૦॥

જીવાય જીવકાયાપિ પ્રાણાય કોશિને ચ તે ।
ખાય કાય ચ સત્યાય તસ્મૈ કૃષ્ણાત્મને નમઃ ॥ ૭૧॥

તીર્થાય સાધુરૂપાય સર્વજ્ઞાય વિહારિણે ।
મુક્તયે મુક્તિદાત્રે ચ તસ્મૈ કૃષ્ણાત્મને નમઃ ॥ ૭૨॥

ચિદચિત્સર્વરૂપાય વિમાનસ્થાય મૂર્તયે ।
બાલાય બાલકૃષ્ણાય કાન્તકૃષ્ણાય તે નમઃ ॥ ૭૩॥

બ્રહ્મપ્રિયાધિપતયે કોટિશક્તીશ્વરાય ચ ।
શતચત્વારિંશદૂર્ધ્વકન્યાકાન્તાય તે નમઃ ॥ ૭૪॥

માયાકાલપુરુષાણાં પતયે ધામધામિનામ્ ।
ઈશજીવાધિપતયે તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૭૫॥

ગોચરાયાઽગોચરાય ષષ્ટિવન્દ્યાય મૂર્તયે ।
શરણં સ્મઃ સમાપન્નાઃ શરણ્યાય ચ તે નમઃ ॥ ૭૬॥

એવં સ્તુત્વા રાધિકે! તે વૃકાયનાભિકાङ્ક્ષયા ।
પુષ્પાઞ્જલીન્નિબદ્ધ્યૈવ વિમાનભૂમિકાં યયુઃ ॥ ૭૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧૬૫-અધ્યાયાન્તર્ગતં
ષષ્ટિબાલૈઃ કૃતં બાલકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧૬૫/૪૮-૭૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 165/48-77..

Proofread by PSA Easwaran

*Shashtibalaih Kritam Balakrishna Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*